**19E**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहिःस्थ**

**परीक्षा : डिसेंबर – २०२३**

**सत्र ४ थे**

**विषयः ऐतिहासिक काव्ये (19E446)**

| दिनांक : २१/१२/२०२३ | गुण :८० | वेळ : दु. २.०० ते ५.०० |
|---|---|---|

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र.१.अ) माध्यमभाषचा कमप्येकं परिच्छेदम् अनुवदत –** **(१०)**

१) दर्पस्फुटितसरसव्रणोच्छलितरुधिरच्छटावसेकैः शोकविषप्रसुप्तं प्रबोधयन्निव पराक्रममनुजयवादीत्, 'आयुष्मन्! इदं राजकुलम्, अमी बान्धवाः, परिजनोऽयम्, इयं भूमिः, भूपतिभुजपरिघगलिताश्चैताः प्रजाः, गतोऽहमद्यैव मालवराजकुलप्रलयाय। इदमेव तावद्वल्कलग्रहणमिदमेव तपः शोकागमोपयश्चायमेव यदन्त्यन्ताविनीतारिनिग्रहः।

२) किं पुनरीदृशे दुर्जाते जाते जातामर्षनिर्भिरे च मनसिनास्त्येवावकाशः शोकाक्रियाकरणस्य? अपि च हृदयविषमशल्ये मुसल्ये जीवति जाल्मे जगद्विगर्हिते गौडधिपाधमचण्डाल जिह्रेमि शुष्काधरपुटःपीडेव प्रतिकारशून्यं शुचा शूत्कर्तुम्।

**प्र.१.आ) माध्यमभाषया द्वौ श्लोकौ अनुवदत–** **(१०)**

१) नानाहेतिशताभिघातपतितभ्रान्ताश्वपत्तिद्विपे नृत्यद्भीमकबन्धखड्गकिरणज्वालासहस्रे रणे।
लक्ष्मीर्भावितचापलापि च कृता शौर्येण येनात्मसाद् राजासीज्जयसिंहवल्लभ इति ख्यातश्चलुक्यान्वयः।।

२) त यदुपचितमन्त्रोत्साहशक्तिप्रयोगक्षयितबलविशेषो मङ्गलेशः समन्तात्। स्वतनयगतराज्यारम्भयत्नेन सार्धं
निजमतनु च राज्यञ्जीवितञ्चोज्झति स्म।।

३) रणपराक्रमलब्धजयश्रिया सपदि येन विरुग्णमशेषतः। नृपतिगन्धगजेन महौजसा पृथुकदम्बकदम्बकदम्बकम्।।

**प्र.२.अ) ससन्दर्भं स्पष्टीकरणं लिखत। (द्वयोः)** **(१०)**

१) श्रूयतां मे प्रतिज्ञा।

२) प्रतापसहाया हि सत्त्ववन्तः।

३) अकाशताकाशे शशाङ्कमण्डलम्।

**प्र.२.आ) ससन्दर्भं स्पष्टीकरणं लिखत। (द्वयोः)** **(१०)**

१) जयति स सत्याश्रयः सुचिरम्।

२) भयविगळितहर्षो येन चाकारि हर्षः।

३) कर्ता कारयिता चापि रविकीर्तिः कृती स्वयम्।

**प्र.३.अ) टिप्पणीमेकां लिखत।** **(०५)**

१) त्रिमहाराष्ट्रकम्

२) यथासङ्ख्यालङ्कारः

**प्र.३.आ) टिप्पणीमेकां लिखत।** **(१५)**

१) राज्यवर्धनस्य परिचारकाः

२) शत्रुराज्ये उपलिङ्गानि

३) अशौचदिवसाः

**प्र.४.अ) सविस्तरमेकमुत्तरत।** **(१५)**

१) राज्यवर्धनस्य विरक्तिविचारान् तथा तस्य क्रोधोत्पत्तिं लिखत।

२) स्कन्दगुप्तेन हर्षस्योपदेशः कथं कृतः?

**प्र.४.आ) सविस्तरमेकमुत्तरत।** **(०५)**

१) चालुक्यवंशस्य महत्तां लिखत। २) कीर्तिवर्मणः पराक्रमं लिखत।

----------